Roll No. : ......................................

Total No. of Questions : **12** ]   [ Total No. of Printed Pages : **4**

# APF–2033–A

## M.A. (Final) Examination, 2022

## SANSKRIT

Paper - VI (ख)

## (आधुनिक साहित्य)

*Time : **3** Hours* ]   [ *Maximum Marks : **100***

**खण्ड–अ**   **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब**   **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए। (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स**   **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वेऽपि दश प्रश्ना: समाधेया:। प्रतिप्रश्नं हि अङ्कद्वयं निर्धारितमस्ति। उत्तरम् अधिकाधिकं 50 शब्दात्मकम्।

   (i) विवेकानन्दविजयम् इति नाटकस्य नायक: कोऽस्ति ?

   (ii) विवेकानन्दविजयस्य प्रथमा:ङ्कस्य नाम किमस्ति ?

(iii) विवेकानन्दविजयस्य कस्मिन् अङ्के मातृभूमिवर्णनम् पुनः पुनः कृतमस्ति ?

(iv) श्रीधरभास्करवर्णेकरः कस्य नगरस्य निवासी आसीत् ?

(v) संस्कृतसाहित्ये प्रथमः उपन्यासः कः मन्यते, कश्च तस्य लेखकः ?

(vi) ''एवं स ज्ञातास्वादः पौनः पुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्''—अत्र कस्य लुण्ठाकस्य वर्णनं क्रियते ?

(vii) ''विष्णोर्माया भगवती यया सम्मोहितं जगत्''—शिवराजविजयइत्यस्य आदौ उद्धृता इयं पंक्तिः मूलतः कस्माद् ग्रन्थाद् उद्धृता वर्तते ?

(viii) विद्याधरनीतिरत्नम् इति ग्रन्थस्य लेखकः कोऽस्ति ?

(ix) ''जय जय हे भगवती सुरभारती'' इति गीति-पंक्ति शुद्धरूपेण लिखतु।

(x) ''तमः प्रकाशं न कदापि सूते।'' इत्यस्याः सूक्तेः अर्थं स्पष्टीकरोतु।

**खण्ड–ब**

**नोट** :– अत्र सप्तसु केचन पञ्चप्रश्नाः समाधेयाः। द्वितीयः तृतीयश्च प्रश्नः अनिवार्यः। प्रत्येकं प्रश्नस्य अष्टौ अङ्काः। उत्तरं च **200** शब्दात्मकम्।

2. अधस्तनपद्ये कस्यचिदेकस्य संस्कृत व्याख्या कार्या—

सर्वेऽत्र प्रेमिणः सन्तु सर्वेऽपि प्रणयाकुलाः।
सर्वे प्रेमाणि कुर्वन्तु निष्प्रेमा कोऽपि नो भवेत्॥

**अथवा**

हिमाद्रि किं मयानीतः विन्ध्याद्रिर्वा विनामितः।
हनूमतेव तीर्णोऽब्धिः पीतोऽगस्त्यर्षिणेव वा॥

3. संस्कृतेन व्याख्या कार्या—

दृढ़ो यस्यात्मविश्वासः साध्यं तेन न किं भवे।
आत्मैव सर्वशक्तीनां गुणानां चाकरो मतः॥

**अथवा**

भाग्ये यल्लिखितं तत् स्यात् न जाने किं कदा सखे।
शक्यते यत् त्वया कर्त्तुं कुरु त्वं तद्धिः साम्प्रतम्॥

4. अधस्तन गद्यावतरणस्य पद्यांशस्य वा व्याख्या विधेया–

भावोत्कटम् इदं पद्यम्। अहो अस्याः स्वरमाधुर्यं संगीतकौशल्यं च। मन्ये साक्षात्वीणावरदण्डमण्डितकरा देवी सरस्वती गायति। विवेकानन्द इति नाम भाजापि मया अविवेकवशात् अवज्ञाता इयं नर्तकी। संन्यासिनि अपि मयि, न अद्यापि समुदितं तत् सर्वत्र समदर्शित्वम्। न अहम् अद्यापि भेदातीतोऽस्मि। (नेत्रे निमील्य) सर्वं खल्विदम् ब्रह्म। इयं नर्तकी अपि ब्रह्म एव तत्त्वतः। (नर्तकीं प्रति प्रणम्य) देवि! मातः! अद्य तव मनोहारिणा गीतरागेण सम्यग् उद्बोधितं मे वेदान्ततत्त्वम्!

**अथवा**

विशालं भूगोलं भगवति! महामन्दिरमिति

त्वदीयाया मूर्तेरतिशयपवित्रं हि गणयन्।

विधुः प्रायश्चित्तीव स निज महापापमनिशं

ध्रुवं दूरीकर्तुं स्वभिमुखमभिभ्राम्यति चिरम्॥

5. अधस्तन गद्यखण्डस्य सप्रसङ्गमनुवादो कार्यः–

ततः स उवाच–"महात्मन् क्वाधुना विक्रमराज्यम् ? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदशशतकानि व्यतीतानि। क्वाधुना मन्दिरे-मन्दिरे जय-जयध्वनिः ? क्व सम्प्रति तीर्थे-तीर्थे घण्टानादः ? क्वा द्यापि मठे-मठे वेदघोषः ? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते; क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद्दारा अपह्रियन्ते, क्वचित् धनानि लुण्ठ्यन्ते, क्वचिदार्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः, इत्येव श्रूयतेऽवलोक्यते च परितः।"

6. सप्रसङ्गमनूद्यतामेष गद्यांशः–

अथ समापितसन्ध्यावन्दनादिक्रिये, समायाते गुरौ,

तदाज्ञया नित्यनियमसम्पादनाय प्रयाते गौर बटौ,

छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु,

"इत आगम्यतां, सनाथ्यतामेष आश्रमः" इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च।"

7. सप्रसङ्ग व्याख्यां कार्या–

सन्तानसम्पत्तिरमूल्यरत्नं

सुसन्ततिर्लोकहितायलोके।

सामाजिकीयं महती ह्यपेक्षा

यत्नेन रक्ष्याथ सुशिक्षणीया॥

8. मधुच्छन्दा–ग्रन्थे वर्णितां मातृवन्दना–गीतिः सोद्धारणं समीक्ष्यताम्।

**खण्ड–स**

**नोट** :– अत्र चतुर्षु प्रश्नेषु यथेच्छं किमपि प्रश्नद्वयं समाधेयम्। प्रत्येकं प्रश्नस्य **20** अङ्काः।

9. श्रीधरभास्कर वर्णेकरस्य नाट्यकला समीक्ष्यताम्।

10. हरिरामाचार्यस्य मधुच्छन्दाग्रन्थस्य।

**अथवा**

विद्याधरशास्त्रिणः नीतिरत्नस्य मूल्याङ्कनं सविस्तरं क्रियताम्।

11. शिवराजविजयम् इति काव्यस्य वैशिष्ट्यं प्रतिपाद्यताम्।

12. अधोलिखितेषु अर्वाचीनकविषु कयोश्चिद् द्वयोः विवरणं प्रस्तूयताम्–

(i) प्रो. राधावल्लभ त्रिपाठी

(ii) प्रो. अभिराज राजेन्द्र मिश्रः

(iii) पं. श्रीरामः दवे

(iv) पं. विद्याधरः शास्त्री